**शिक्षा निदेशालय, राष्ट्रीय राजधानी क्षेत्र, दिल्ली**

# ।।अभ्यासप्रश्नपत्रम्।।

**मध्यावधि: परीक्षा (2022-23)**

**कक्षा – सप्तमी**

**विषय: - संस्कृतम्**

**अवधि:-सार्धहोराद्वयम्** **पूर्णाङ्का:-60**

**निर्देशा: -**

1. **प्रश्नपत्रे चत्वार: खण्डा: सन्ति।**

खण्ड: (क) अपठितावबोधनम् – 8 अङ्का:
खण्ड: (ख) रचनात्मक – कार्यम् -12 अङ्का:
खण्ड: (ग) अनुप्रयुक्त- व्याकरणम् – 18 अङ्का:
खण्ड: (घ) पठितावबोधनम् - 22 अङ्का:

2. सर्वे प्रश्ना: अनिवार्या:।
3. उत्तराणि संस्कृतेनैव लेखनीयानि।
4. प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।
5. प्रश्नसंख्या अवश्यमेव लेखनीया।

**खण्ड: - क**

**अपठितावबोधनम् – (8 अङ्का:)**

**प्र. 1 अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।**

विद्यालयस्य पूर्वभागे एक: पुस्तकालय: अस्ति। पुस्तकालये विविधा: ग्रन्था: सन्ति। ग्रन्था: अस्मान् ज्ञानं प्रयच्छन्ति। छात्रा: अवकाश- समयस्य सदुपयोगाय

पुस्तकालये आगच्छन्ति। पुस्तकालये विविधा: पत्र -पत्रिका: सन्ति। पुस्तकालय - अध्यक्ष: अपि सहज:सरलश्च अस्ति। पुस्तकालय: वातानुकूलितम् अस्ति। पुस्तकालये संसाधनानाम् अभाव: कुत्राSपि नावलोकित:।

अ. एकपदेन उत्तरत –(केवलं प्रश्नत्रयम्) 1x3=3

(क) विद्यालयस्य पूर्वभागे किम् अस्ति ?

(ख) पुस्तकालय: कीदृशम् अस्ति ?

(ग) ग्रन्था: अस्मान् किं प्रयच्छन्ति ?

(घ) पुस्तकालये विविधा: के सन्ति ?

ब. पूर्णवाक्येन उत्तरत –( केवलं प्रश्नमेकम्) 2x1=2

(क) छात्रा:किमर्थं पुस्तकालये आगच्छन्ति ?

(ख) क: सहज: सरलश्च अस्ति ?

स.प्रदत्त विकल्पेभ्य: उचितम् उत्तर चित्वा लिखत - ( केवलं प्रश्नद्वयम् ) 1X2=2

(i).अनेका: इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्?

(क)विविधा: (ख)अस्मान्

(ग)अभाव: (घ) ग्रन्था:

(ii).असहज: इति पदस्य किं विपरीतार्थकं पदं गद्यांशे प्रयुक्तम्?

(क)सरल: (ख) विविधा:

(ग)सहज: (घ) अभाव:

(iii).ग्रन्था: इति विशेष्यपदस्य विशेषणपदं किम् अत्र प्रयुक्तम् ?

(क)छात्रा: (ख) विविधा:

(ग)पुस्तकालय: (घ) विद्यालय:

(द) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।        1x1=1

**खण्ड-ख**

**रचनात्मक-कार्यम् (12 अङ्काः)**

**2   चित्रं दृष्ट्वा मञ्जूषापदसहायतया चत्वारि वाक्यानि रचयत।          2x4=8**



मञ्जूषा

| |
|---|
| सूर्योदयः , उड्डयन्ति , पर्वताः , खगाः, पुष्पाणि, नदी , प्रवहति , भवति , वृक्षः |

अथवा

" मम -परिचय" इति विषयमधिकृत्य पञ्च वाक्यानि लिखत।

**प्र. 3 पदानां मेलनं कृत्वा वाक्यरचनां कुरूत –** 1× 4 = 4

| | | | |
|---|---|---|---|
| (i) | बालका: | गीतं | खादन्ति |
| (ii) | सीता | वस्त्रं | गच्छामि |
| (iii) | सौचिक: | फलानि | सीव्यति |
| (iv) | अहं | विद्यालये | गायति |

**खण्ड – ग**

**अनुप्रयुक्त – व्याकरणम् (18 अङ्का:)**

**प्र.-4 अधोलिखतानां शब्दानां विभक्ती: लिखत - ( केवलं प्रश्नचतुष्टयम् )** 1x4=4

शब्द: विभक्ति:

(i) मतय: …………..

(ii) शिक्षायै ………….

(iii)मनोरमया ………….

(iv)सर्वेषाम् ………….

(V) वारिषु। …………….

**प्र.-5 उपसर्ग-आधारितान् शब्दान् संयोज्य विभज्य वा लिखत –(केवलं प्रश्नत्रयम् )**

1x3=3

(i)अपयश: = …………….+………….

(ii)अनु + भवसि = …………………………….

(iii)आहार: = ………………+…………..

(iv) सम् + तुष्ट: = ………………………………

**प्र.-6 मंजूषात: अङ्कानां कृते पदानि चिनुत – ( केवलं प्रश्नचतुष्टयम् ) 1x4=4**

(i) 40 = ………………………….

(ii) 18 = ……………………………

(iii) 22 = ………………………….

(iv) 36 = …………………………..

(v) 45 = …………………………..

मञ्जूषा

| |
|---|
| अष्टादश: , द्वाविंशति: , पञ्चचत्वारिंशत्, षड्त्रिंशत् , चत्वारिंशत् |

**प्र. 7 अधोलिखितानां शब्दानां कृते मञ्जूषात: चित्वा संस्कृतपदं लिखत – ( केवलं प्रश्नचतुष्टयम् )** 1x4=4

(i) कछुआ =…………………..।

(ii) निर्धन =……………………।

(iii) सरलता =…………………..।

(iv) अकाल =…………………..।

(v) राख =……………………..।

मञ्जूषा

| |
|---|
| ऋजुता, विपन्न: , कूर्म: , दुर्भिक्ष: , भस्म |

**प्र.-8 मञ्जूषापदसहायतया क्रियापदं चित्वा वाक्यानि पूरयत – (केवलं प्रश्नत्रयम् )**

1x3=3

(i)हंसाभ्यां सह कूर्मोऽपि ………………………।

(ii)अहं किञ्चिदपि न ……..…………………।

(iii)एक: कूर्म: अपि तत्रैव………………………..।

(iv)वयं गृहं नीत्वा कूर्मं …………………………..।

मञ्जूषा

| |
|---|
| उड्डीयते , भक्षयिष्याम: ,वदिष्यामि , प्रतिवसति स्म |

**भाग – घ**

**पठितावबोधनम् (22 अङ्का:)**

**प्र.-9 अधोलिखितं गद्यांशं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**

अथ एकदा धीवरा: तत्र आगच्छन्। ते अकथयन् – वयं श्व: मत्स्यकूर्मादीन् मारयिष्याम:। एतत् श्रुत्वा कूर्म: अवदत् -मित्रे ! किं युवाभ्यां धीवराणां वार्ता श्रुता ? अधुना किम् अहं करोमि ? हंसौ अवदताम् -प्रात: यद् उचितं तत्कर्त्तव्यम्। कूर्म: अवदत् – मैवम्। तद् यथाऽहम् अन्यं ह्रदं गच्छामि तथा कुरुतम्। हंसौ अवदताम् -आवां किं करवाव: ? कूर्म: अवदत् – अहं युवाभ्यां सह आकाशमार्गेण अन्यत्र गन्तुम् गच्छामि।

अ.एकपदेन उत्तरत –(केवलं प्रश्नमेकम्) 1x1=1

(i)सरस्तीरे के आगच्छन् ?

(ii)कूर्म: केन मार्गेण अन्यत्र गन्तुम् इच्छति ?

ब.पूर्णवाक्येन उत्तरत –(केवलं प्रश्नमेकम्) 2x1=2

(i)धीवरा: किम् अकथयन् ?

(ii)हंसौ किम् अवदताम् ?

स.प्रदत्त विकल्पेभ्य: उचितम् उत्तर चित्वा लिखत - ( केवलं प्रश्नद्वयम् ) 1x2=2

१. प्रात: इति पदस्य विपरीतार्थकं पदं किम् ?

(क) रात्रौ (ख) दिवा

(ग) सायम् (घ) मध्यान्ह

२. हंसौ अत्र का विभक्ति: अस्ति ?

(क)प्रथमा (ख) द्वितीया

(ग) तृतीया (घ) चतुर्थी

३. ह्रदम् इति पदस्य पर्यायवाचीपदं किम् ?

(क)समुद्र: (ख) तडाग:

(ग)नदी (घ) कूप:

**प्र.-10 अधोलिखितं श्लोकं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत**

**मित्रेण कलहं कृत्वा न कदापि सुखी जन:।**

**इति ज्ञात्वा प्रयासेन तदेव परिवर्जयेत् ।।**

अ.एकपदेन उत्तरत –(केवलं प्रश्नमेकम्) 1x1=1

(i)केन कलहं न करणीयम् ?

(ii)क: सुखी न भवति ?

ब.पूर्णवाक्येन उत्तरत –(केवलं प्रश्नमेकम्) 2x1=2

(i)प्रयासेन किं परिवर्जयेत् ?

(ii)क: कदापि सुखी न भवति?

स.प्रदत्त विकल्पेभ्य: उचितम् उत्तर चित्वा लिखत – ( केवलं प्रश्नद्वयम् ) 1x2=2

१. “सुखी” इति पदस्य विपरीतार्थकं पदं किम् ?

(क)कामी (ख) दु:खी

(ग) मैत्री (घ) निमग्न:

२. मित्रेण अत्र का विभक्ति: अस्ति ?

(क)प्रथमा (ख) द्वितीया

(ग)तृतीया (घ) चतुर्थी

३. “मित्र” इति पदस्य पर्यायवाचीपदं किम् ?

(क) शत्रु: (ख) सुहृद:

(ग)जन: (घ) सौख्यम्

**प्र.-11 अधोलिखितं संवादं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**

श्रीकंठ: अकथयत् – मित्र ! अहं भवतां सत्कारेण सन्तुष्टोऽस्मि। केवलम् इदमेव मम दु:खं यत् तव गृहे एकोऽपि भृत्य: नास्ति ।मम सत्काराय भवतां बहु कष्टं जातम् । मम गृहे तु बहव:कर्मकरा: सन्ति।

तदा कृष्णमूर्ति: अवदत् -मित्र! ममापि अष्टौ कर्मकरा: सन्ति। ये द्वौ पादौ , द्वौ हस्तौ , द्वे नेत्रे , द्वे श्रोत्रे इति।

अ.एकपदेन उत्तरत –(केवलं प्रश्नमेकम्) 1 ×1=1

(i)कस्य गृहे भृत्य: नास्ति ?

(ii) क: सत्कारेण सन्तुष्ट: अस्ति ?

ब.पूर्णवाक्येन उत्तरत –(केवलं प्रश्नमेकम् ) 2 ×1=2

(i) कृष्णमूर्ते: कति कर्मकरा: सन्ति ?

(ii) कस्य गृहे बहव: कर्मकरा: सन्ति ?

स.प्रदत्त विकल्पेभ्य: उचितम् उत्तर चित्वा लिखत – ( केवलं प्रश्नद्वयम् ) 1x2=2

१. सन्तुष्ट: इति पदस्य विपरीतार्थकं पदं किम् ?

(क)परितुष्ट: (ख) लुब्ध:

(ग)असन्तुष्ट: (घ) ईर्ष्यालु:

२.नेत्रे इति पदस्य पर्यायवाचीपदं किम् ?

(क)पादौ (ख)श्रोत्रौ

(ग)लोचने (घ) हस्तौ

३.गृहे अत्र का विभक्ति: अस्ति ?

(क) द्वितीया (ख) पञ्चमी

(ग) षष्ठी (घ) सप्तमी

**प्र.-12 रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत –** 1×4=4

(क) मृत्यु: न प्रतीक्षते।

(ख) कलहं कृत्वा नर: दु:खी भवति।

(ग) पितरं कर्मणा सेवेत।

(घ) रमाबाई मुम्बईनगरे शारदा सदनम् अस्थापयत्।

**प्र. 13 विलोमपदानि योजयत – ( केवलं प्रश्नत्रयम् )** 1x3=3

(क)अध: नीचै:

(ख)अन्त: सुबुद्धे:!

(ग) दुर्बुद्धे! उपरि

(घ)उच्चै: बहि: